shrinath.udupa@gmail.com

❀ श्री पशुपतिभ्यो नमः ❀

❀ श्री वेदपादस्तोत्रम् ❀

श्रीपशुपतिनाथस्य मुख्यार्चकेन (बसरूर अडिग) इत्युपाह्वेन

रायल सुब्रह्मण्य शास्त्रिणा श्लोकचतुष्पादस्थ-

वेदऋचां स्थानानुक्रमणिका-

सूचनमपि सधामति

संशोधितम् ।

G. N. SHRINATH UDUPA
"GURUPURA SIRI" # 2/217
Kundapur, Udupi - 576 211
Kundapur Tq., Udupi Dist.
Cell : +91-9741006
Email : shrinath.udupa@gmail.com

इदं च उडुपाभिख्येन

बो० डो० के० नारायणशास्त्रिणा

शिवाष्टोत्तरशतनामस्तोत्रादीन् संगृह्य प्रकाशितम्

प्रथमावृत्तिः
२०००


१९९८ वि०

य सर्वाधिकाराः प्रकाशकर्त्रा स्वायत्तीकृताः सन्ति)

shrinath.udupa@gmail.com

॥ श्रीगणेशाय नमः ॥

अथ
श्रीवेदपादस्तोत्रप्रारम्भः ।



ऋषय ऊचुः

पुण्डरीकपुरं प्राप्य जैमिनिर्मुनिसत्तमः ।
किं चकार महायोगी सूत नो वक्तुमर्हसि ॥१॥

सूत उवाच

भगवान् जैमिनिर्धीमान् पुण्डरीकपुरे पुरा ।
महर्षिसिद्धगन्धर्वयक्षकिन्नरसेविते ॥ २ ॥
नृत्यद्भिरप्सरःसंघैर्दिव्यगानैश्च शोभिते ।
नृत्यन्तं परमीशानं ददर्श सदसि प्रभुम् ॥ ३ ॥
ननाम दूरतो दृष्ट्वा दण्डवत् क्षितिमण्डले ।
पपावुत्थाय देवस्य ताण्डवाऽमृतमागलम् ॥ ४ ॥
पार्श्वस्थितां महादेवीं पश्यन्तीं तस्य ताण्डवम् ।
दृष्ट्वा सुसंहृष्टमनाः पपात पुरतो मुनिः ॥ ५ ॥
ततः शिष्यान् समाहूय सर्वशास्त्रार्थपारगान् ।
अग्निकेशमकेशं च शतयागं जटाधरम् ॥ ६ ॥

shrinath.udupa@gmail.com

वक्रनासं समित्पाणिं धूमगन्धिं कुशासनम् ।
एतैः सार्धं महादेवं पूजयामास जैमिनिः ॥ ७ ॥
ततोपि वेदवेदान्तसारार्थं तत्प्रसादतः ।
कृताञ्जलिरुवाचेमं वेदान्तस्तवमुत्तमम् ॥ ८ ॥

जैमिनिरुवाच ।

ॐ विघ्नेश विधिमार्तण्ड चन्द्रेन्द्रोपेन्द्रवन्दित । सं. अ. अ. व.
नमो गणपते तुभ्यं ब्रह्मणां ब्रह्मणस्पते ॥ १ ॥ ऋ. २।६।२९
उमाकोमलहस्ताब्जसम्भावितललाटिकम् ।
हिरण्यकुण्डलं वन्दे कुमारं पुष्करस्रजम् ॥ २ ॥ य. ३४।१
शिवं विष्णोश्च दुर्दर्शं नरः कस्तोतुमर्हति ।
तस्मान्मत्तः स्तुतिः सेयमुग्रादृष्टिरिवाजनि ॥ ३ ॥ ऋ. ५।६।१७
नमः शिवाय साम्बाय नमः शर्वाय शम्भवे ।
नमो नटाय रुद्राय सदसस्पतये नमः ॥ ४ ॥ य. ३।१।४।४
पादभिन्नभूर्लोकाय मौलिभिन्नाण्डभित्तये ।
भुजभ्रान्तदिगन्ताय भूतानां पतये नमः ॥ ५ ॥ य. ११।२।१९
क्वणन्नूपुरयुग्माय विलसत्कृत्तिवाससे ।
फणीन्द्रमेखलायास्तु पशूनां पतये नमः ॥ ६ ॥ य. ४।५।२।१
कालकालाय सोमाय योगिने शूलपाणये ।
अस्थिभूषाय शुद्धाय जगतां पतये नमः ॥ ७ ॥ य. ४।५।२।१
पात्रे सर्वस्य जगतो नेत्रे सर्वदिवौकसाम् ।
गोत्राणां पतये तुभ्यं क्षेत्राणां पतये नमः ॥ ८ ॥ य. ४।५।२।१

shrinath.udupa@gmail.com

शङ्कराय नमस्तुभ्यं मङ्गलाय नमोस्तु ते ।
धनानां पतये तुभ्यमन्नानां पतये नमः ॥ ९ ॥ य. ४।५।२।१
अष्टांगायातिहृष्टाय क्लिष्टभक्तेष्टदायिने ।
इष्टिघ्नायेष्टितुष्टाय पुष्टानां पतये नमः ॥१०॥ य. ४।५।२।१
पञ्चभूताधिपतये कालाधिपतये नमः ।
नम आत्माधिपतये दिशां च पतये नमः ॥ ११ ॥ य. ४।५।२।१
विश्वकर्त्रे महेशाय विश्वभर्त्रे पिनाकिने ।
विश्वहर्त्रेग्निनेत्राय विश्वरूपाय वै नमः ॥ १२ ॥ य. ११।१०।१२
ईशान ते तत्पुरुष नमो घोराय ते सदा ।
वामदेव नमस्तेस्तु सद्यो जाताय वै नमः ॥ १३ ॥ य. ११।१०।४२
भूतिभूषाय भक्तानां भीतिभंगरताय ते ।
नमो भवाय भर्गाय नमो रुद्राय मीढुषे ॥ १४ ॥ य. १०।७८
सहस्राङ्घ्राय साम्बाय सहस्राभीषवे नमः ।
सहस्रबाहवे तुभ्यं सहस्राक्षाय मीढुषे ॥ १५ ॥ य. ४।५।१।३
सुकपोलाय सोमाय सुललाटाय सुभ्रुवे ।
सुदेहाय नमस्तुभ्यं सुमृळीकाय मीढुषे ॥ १६ ॥ ऋ. २।१।२६
भवक्लेशनिमित्ताय भवच्छेदकृते सताम् ।
नमस्तुभ्यमषाढाय सहमानाय वेधसे ॥ १७ ॥ ऋ. २।६।२७
वन्देहं देवमानन्दसन्दोहं लास्यसुन्दरम् ।
समस्तजगतां नाथं सदासुस्थितिमद्भुतम् ॥ १८ ॥ ऋ. १।१।३५
सुजङ्घं सुन्दरं सूरुं सुकण्ठं सोमभूषणम् ।
सुगण्डं सुदृशं वन्दे सुगन्धिं पुष्टिवर्धनम् ॥ १९ ॥ ऋ. ५।४।३०

shrinath.uadupa@gmail.com

भिक्षाहारं हरित्क्षौमं तक्षाभूषं क्षितिक्षमम् ।
यक्षेशेष्टं नमामीशमक्षरं परमं पदम् ॥ २० ॥ य. ११।१०।१३
अर्धालकमवस्त्रार्धमस्थ्युत्पलदलस्रजम् ।
अर्धपुंलक्षणं वन्दे पुरुषं कृष्णपिङ्गलम् ॥ २१ ॥ य. ११।१०।१२
सकृत्प्रणतसंसारमहासागरतारकम् ।
प्रणमामि तमीशानं जगतस्तस्थुषस्पतिम् ॥ २२ ॥ ऋ. ५।५।१०
धातारं जगतामीशं दातारं सर्वसम्पदाम् ।
नेतारं मरुतां वन्दे जेतारमपराजितम् ॥ २३ ॥ ऋ. ४।१।१८
तन्त्वामन्तकहन्तारं वन्दे मन्दाकिनीधरम् ।
ततानि विदधे योयमिमानि त्रीणि विष्टपा ॥ २४ ॥ ऋ. ६।६।१४
सर्वज्ञं सर्वगं सर्वं कविं वन्दे तमीश्वरम् ।
यतश्च यजुषा सार्धमृचः समानि जज्ञिरे ॥ २५ ॥ ऋ. ८।४।१८
भवन्तं सुदृशं वन्दे भूतभव्यभवन्ति च ।
त्यजन्तीतरकर्माणि यो विश्वाभि विपश्यति ॥ २६ ॥ ऋ. ८।८।४५
हरं सुरनियन्तारं परन्तमहमानतः ।
यदाज्ञया जगत्सर्वं व्याप्य नारायणः स्थितः ॥ २७ ॥ य. ११।१०।१३
तन्नमामि महादेवं यन्नियोगादिदं जगत् ।
कल्पादौ भगवान्धाता यथापूर्वमकल्पयत् ॥ २८ ॥ ऋ. ८।८।४८
ईश्वरन्तमहं वन्दे यस्य लिङ्गमहर्निशम् ।
यजन्ते सह भार्याभिरिन्द्रज्येष्ठामरुद्गणाः ॥ २९ ॥ ऋ. २।८।९
नमामि तमिमं रुद्रं यमभ्यर्च्य सकृत् पुरा ।
अवापुः स्वं स्वमैश्वर्यं देवासः पूर्वरातयः ॥ ३० ॥ ऋ. १।२।६

shrinath.udupa@gmail.com

तं वन्दे देवमीशानं यं शिवं हृदयाम्बुजे ।
सततं यतयः शान्ताः संजानाना उपासते ॥ ३१ ॥ ऋ. ८।८।४६
तदस्यै सततं कुर्मो नमः कमलकान्तये ।
उमाकुचपदोरस्का यातेरुद्र शिवातनूः ॥ ३२ ॥ य. ४।५।१।१
नमस्ते रुद्रभावाय नमस्ते रुद्रकेलये ।
नमस्ते रुद्रशान्त्यै च नमस्ते रुद्र मन्यवे ॥ ३३ ॥ य. ४।५।१।१
वेदाश्वरथनिष्ठाभ्यां पादाभ्यां त्रिपुरान्तक ।
बाणकार्मुकहस्ताभ्यां बाहुभ्यामुत ते नमः ॥ ३४ ॥ य. ४।५।१।१
ईशानं सकलाराध्यं वन्दे सम्पत्समृद्धिदम् ।
यस्य चासीद्धरिः शस्त्रं ब्रह्मा भवति सारथिः ॥ ३५ ॥ ऋ. २।३।१
नमस्ते वासुकीज्याय विष्फाराय च शंकर ।
महते मेरुरूपाय नमस्ते अस्तु धन्वने ॥ ३६ ॥ य. ४।५।१।१
नमः परशवे देव शूलायानलरोचिषे ।
हर्यग्नीन्द्रात्मने तुभ्यमुतोत इषवे नमः ॥ ३७ ॥ य. ४।५।१।१
सुरेतरवधूहारहारीणि हर यानि ते ।
अन्यान्यस्त्राण्यहं तूर्णमिदं तेभ्योकरं नमः ॥ ३८ ॥ ऋ. ८।३।२३
धराधरसुतालोलासरोजाहतबाहवे ।
तस्मै तुभ्यमवोचाम नमो अस्मा अवस्यवः ॥ ३९ ॥ ऋ. १।८।६
रक्षमामक्तमं क्षीणमक्षक्षतमशिक्षितम् ।
अनाथं दीनमापन्नं दरिद्रं नीललोहित ॥ ४० ॥ य. ४।५।१०।१
दुर्मुखं दुष्क्रियं दुष्टं रक्षमामीश दुर्दृशम् ।
मादृशानामहं न त्वदन्यं विन्दामि राधसे ॥ ४१ ॥ ऋ. ६।२।१७

shrinath.udupa@gmail.com

भवाख्येनाग्निना शम्भो रागद्वेषमदार्चिषा ।
दयालो दह्यमानानामस्माकमविता भव ॥ ४२ ॥ ऋ. २।५।६
परदारं परावासं परवस्त्रं परप्रियम् ।
हर पाहि परान्नम्मां पुरुणामन् पुरुष्टुत ॥ ४३ ॥ ऋ. ६।६।२४
लौकिकैर्यत्कृतं पुष्टैर्नावमानं सहामहे ।
देवेश तव दासेभ्यो भूरिदा भूरि देहिनः ॥ ४४ ॥ ऋ. ३।६।३०
लोकानामुपपन्नानां गर्विणामीश पश्यताम् ।
अस्मभ्यं क्षेत्रमायुश्च वसुस्पार्हं तदाभर ॥ ४५ ॥ ऋ. ६।३।४६
याश्चादौ महतीं लज्जामस्मदीयां घृणानिधे ।
त्वमेव वेत्सि नस्तूर्णमिषं स्तोतृभ्य आभर ॥ ४६ ॥ ऋ. ३।८।२२
जाया माता पिता चान्ये मां द्विषन्त्यमतिं कृशम् ।
देहि मे महतीं विद्यां रायाविश्वपुषा सह ॥ ४७ ॥ ऋ. ६।२।२७
अदृष्टार्थेषु सर्वेषु दृष्टार्थेष्वपि कर्मसु ।
मेरु धन्वन्नशक्तेभ्यो बलं धेहि तनूषु नः ॥ ४८ ॥ ऋ. ३।३।२२
लब्धानिष्टसहस्रस्य नित्यमिष्टवियोगिनः ।
हृद्रोगं मम देवेश हरिमाणं च नाशय ॥ ४९ ॥ ऋ. १।४।८
ये ये रोगाः पिशाचा वा नरा देवाश्च मामिह ।
बाधन्ते देव तान् सर्वान् निबाधस्व महाँ असि ॥ ५० ॥ ऋ. ६।४।४७
त्वमेव रक्षितास्माकं नान्यः कश्चन विद्यते ।
तस्मात्स्वीकृत्य देवेश रक्षाणो ब्रह्मणस्पते ॥ ५१ ॥ ऋ. १।१।३४
त्वमेवोमापते माता त्वं पिता त्वं पितामहः ।
त्वमायुस्त्वं मतिस्त्वं श्रीरुत भ्रातोत नः सखा ॥ ५२ ॥ ऋ. ८।८।४४

shrinath.udupa@gmail.com

यतस्त्वमेव देवेश कर्ता सर्वस्य कर्मणः ।
ततः क्षमस्व तत्सर्वं यन्मया दुष्कृतं कृतम् ॥ ५३ ॥ य. ११।१०।१
त्वत्समो न प्रभुत्वेन फल्गुत्वेन च मत्समः ।
अतो देव महादेव त्वमस्माकं तवस्मसि ॥ ५४ ॥ ऋ. ६।६।२०
सुस्मितं भस्मगौरांगं तरुणादित्यविग्रहम् ।
प्रसन्नवदनं सौम्यं गायेत्त्वा नमसा गिरा ॥ ५५ ॥ ऋ. ६।४।४
एष एव वरोस्माकं नृत्यन्तन्त्वां सभापते ।
लोकयन्तमुमाकान्तं पश्येम शरदः शतम् ॥ ५६ ॥ ऋ. ५।५।११
अरोगिणो महाभागा विद्वांसश्च बहुश्रुताः ।
भगवन् त्वत्प्रसादेन जीवेम शरदः शतम् ॥ ५७ ॥ ऋ. ५।५।११
सदारा बन्धुभिः सार्धं त्वदीयं ताण्डवामृतम् ।
पिबन्तः काममीशान नन्दाम शरदः शतम् ॥ ५८ ॥ य. ११।४।४२
देव देव महादेव त्वदीयांघ्रिसरोरुहे ।
कामं मधुमयं पीत्वा मोदाम शरदः शतम् ॥ ५९ ॥ य. ११।४।४२
कीटा नागाः पिशाचा वा ये वा के वा भवे भवे ।
तव दासा महादेव भवाम शरदः शतम् ॥ ६० ॥ य. ११।४।४२
सभायामीश ते दिव्यं नृत्तवाद्यकलस्वनम् ।
श्रवणाभ्यां महादेव शृणवाम शरदः शतम् ॥ ६१ ॥ य. ११।४।४२
स्मृतिमात्रेण संसारविनाशनकराणि ते ।
नामानि तव दिव्यानि प्रब्रवाम शरदः शतम् ॥ ६२ ॥ य. ११।४।४२
इषुसन्धानमात्रेण दग्धत्रिपुर धूर्जटे ।
आधिभिर्व्याधिभिर्नित्यमजीता स्याम शरदः शतम् ॥६३॥ य. ११।४।४२

shrinath.udupa@gmail.com

चारुचामीकराभासं गौरीकुचपदोरसम् ।
कदा नु लोकयिष्यामि युवानं विश्पतिं कविम् ॥ ६४ ॥ ऋ. ६।३।४१
प्रमथेन्द्रावृतं प्रीतवदनं प्रियभाषिणम् ।
सेविष्येहं कदा साम्बं सुभासं शुक्रशोचिषम् ॥ ६५ ॥ ऋ. ६।२।१२
बद्धेनसं मामकृतपुण्यलेशं च दुर्मतिम् ।
स्वीकरिष्यति किं त्वीशो नीलग्रीवो विलोहितः ॥ ६६ ॥ य. ४।५।१
कालशूलानलासक्तभीतिव्याकुलमानसम् ।
कदा नु द्रक्ष्यतीशो मां तुविग्रीवो अनानतः ॥ ६७ ॥ ऋ. ६।४।४५
गायका यूयमायात यदि रायादिलिप्सवः ।
धनदस्य सखेशोयमुपास्मै गायता नरः ॥ ६८ ॥ ऋ. ६।७।३६
आगच्छत सखायो मे यदि यूयं मुमुक्षवः ।
स्तुतेशमेनं मुक्त्यर्थमेषविप्रैरभिष्टुतः ॥ ६९ ॥ ऋ. ६।७।२१
पदे पदे पदे देव पदं नः सेत्स्यति ध्रुवम् ।
प्रदक्षिणं प्रकुरुतमध्यक्षं धर्मणामिमम् ॥ ७० ॥ ऋ. ६।३।३३
सर्वं कार्यं युवाभ्यां हि सुकृतं सुहृदौ मम ।
अञ्जलिं कुरुते हस्तौ रुद्राय स्थिर धन्वने ॥ ७१ ॥ य. १०।८।८
मन्मूर्धन् मरुतामूर्ध्वं भवं चन्द्रार्धमूर्धजम् ।
मूर्धघ्नं च चतुर्मूर्ध्नो नमस्या कन्मलीकिनम् ॥ ७२ ॥ ऋ. २।७।१७
नयने नयनोद्भूतदहनालीढमन्मथम् ।
पश्यतं तरुणं सौम्यं भ्राजमानं हिरण्ययम् ॥ ७३ ॥ ऋ. ६।७।२५
सभायां शूलिनः सन्ध्यानृत्तवाद्यस्वनामृतम् ।
कर्णौ तूर्णं यथाकामं पातं गौरा विवेरिणे ॥ ७४ ॥ ऋ. ६।६।१०

shrinath.udupa@gmail.com

नासिके वासुकिश्वासवासिता भासितो रसम् ।
घ्रायतं गरलग्रीवमस्मभ्यं शर्म यच्छतम् ॥ ७५ ॥ ऋ. १।१।३३
स्वस्त्यस्तु सुखिते जिह्वे विद्यादातुरुमापतेः ।
स्तवमुच्चतरं ब्रूहि जयतामिव दुन्दुभिः ॥ ७६ ॥ ऋ. १।२।२५
चेतः पोत न शोचस्त्वं निन्द्यं विन्दाखिलं जगत् ।
अस्य नृत्तामृतं शम्भो गौरो न तृषितः पिब ॥ ७७ ॥ ऋ. १।१।३०
सुगन्धिं सुखसंस्पर्शं कामदं सोमभूषणम् ।
गाढमालिंग मच्चित्त योषां जारमिव प्रियम् ॥ ७८ ॥ ऋ. ६।८।२२
महामयूखाय महाभुजाय महाशरीराय महाम्बराय ।
महाकिरीटाय महेश्वराय महोमहीं सुष्टुतिमीरयामि ॥ ७९ ॥ ऋ. २।७।१७
यथा कथं चिद्रचिताभिरीश प्रसादतश्चारुभिरादरेण ।
प्रपूजयामि स्तुतिभिर्महेश मषाहमुग्रं सहमानमाभिः ॥ ८० ॥ ऋ. ४।६।४
नमः शिवाय त्रिपुरान्तकाय जगत्त्रयीशाय दिगम्बराय ।
नमोस्तु मुख्याय हराय शम्भो नमो जघन्याय च बुध्नियाय ॥८१॥ य. ४।५।६
नमो विकाराय विकारिणे ते नमो भवायास्तु भवोद्भवाय ।
बहुप्रजात्यन्त विचित्ररूपा यतः प्रसूता जगतः प्रसूती ॥८२॥ य. १११।१०।१
तस्मै सुरेशोरुकिरीटनानारत्नावृताष्टापदविष्टराय ।
भस्माङ्गरागाय नमः परस्मै यस्मात्परं नापरमस्ति किञ्चित्॥८३॥ य. १११।१०।१२
सर्पाधिराजौषधिनाथयुद्धक्षुभ्यज्जटामण्डलगह्वराय ।
तुभ्यं नमः सुन्दरताण्डवाय यस्मिन्निदꣳसं च विचैति सर्वम् ॥८४॥ य. १०।१।११
मुरारिनेत्रार्चितपादपद्ममुमाङ्किलाक्षापरिरक्तपाणिम् ।
नमामि देवं विषनीलकण्ठं हिरण्यदन्तं शुचिवर्णमारात् ॥८५॥ ऋ. ३।६।१४

shrinath.udupa@gmail.com

नमामि नित्यं त्रिपुरारिमेनं यमान्तकं षण्मुखतातमीशम् ।
ललाटनेत्रार्दितपुष्पचापं विश्वं पुराणं तमसः परस्तात् ॥८६॥ य. ११।१०।१

अनन्तमव्यक्तमचिन्त्यमेकं हरं तमाशाम्बरमम्बराङ्गम् ।
अजं पुराणं प्रणमामि योयमणोरणीयान् महतो महीयान् ॥८७॥ य. १०।१०।११

अन्तस्थमात्मानमजं न दृष्ट्वा भ्रमन्ति मूढा गिरिगह्वरेषु ।
पश्चादुदक्दक्षिणतः पुरस्ताद्धस्विदासी दुपरि स्विदासीत् ॥८८॥ ऋ. ८।७।१७

इमं नमामीश्वरमिन्दुमौलिं शिवं महानन्दमशोकदुःखम् ।
हृदम्बुजे तिष्ठति यः परात्मा पुरीत्य सर्वाः प्रदिशो दिशश्च ॥८९॥ य. ११।१०।१

रागादिकापथ्यसमुद्भवेन भग्नं भवाख्येन महामयेन ।
विलोक्य मां पालय चन्द्रमौले भिषक्तमन्त्वा भिषजां शृणोमि ॥९०॥ ऋ. २।७।१६

दुःखाम्बुराशिं सुखलेशहीनमस्पृष्टपुण्यं बहुपातकं माम् ।
मृत्योः करस्थं भव रक्ष भीतं पश्चात् पुरस्तादधरादुदक्तात् ॥९१॥ ऋ. ८।४।९

गिरीन्द्रजाचारुमुखावलोकसुशीतया देव तवैव दृष्ट्या ।
वयं दयापूरितयैव तूर्णमपो ननावादुरिता तरेम ॥ ९२ ॥ ऋ. ५।१।१२

अपारसंसारसमुद्रमध्ये निमग्नमुत्क्रोशमनल्पराग्म् ।
मामक्षमं पाहि महेश जुष्टपोजिष्ठया दक्षिणयेवरातिम् ॥९३॥ ऋ. २।४।८

स्मरन् पुरासंचितपातकानि खरं यमस्यापि मुखं यमारे ।
बिभेमि मे देहि यथेष्टमायुर्यदिं क्षितायुर्यदिं वा परेतः ॥९४॥ ऋ. ८।८।१९

सुगन्धिभिः सुन्दरभस्मगौरैरनन्तभोगैर्मृदुलैरघोरैः ।
इमं कदालिङ्गति मां पिनाकी स्थिरेभिरंगैः पुरुरूप उग्रः ॥९५॥ ऋ. २।७।१७

क्रोशन्तमीशः पतितं भवाब्धौ नागास्यमण्डूकमिवातिभीतम् ।
कदा नु मां रक्ष्यति देवदेवो हिरण्यरूपः सुहिरण्यसन्दृक् ॥९६॥ ऋ. २।७।२३

shrinath.udupa@gmail.com

चारुस्मितं चन्द्रकलावतंसं गौरीकटाक्षार्हमयुग्मनेत्रम् ।
आलोकयिष्यामि कदा नु देवमादित्यवर्णं तमसः परस्तात् ॥९७॥ य. ११।३।१३।१
आगच्छतात्राशु मुमुक्षवो ये यूयं शिवं चिन्तयतान्तराब्जे ।
ध्यायन्ति मुक्त्यर्थमिमं हि नित्यं वेदान्तविज्ञानसुनिश्चितार्थाः ।९८। य. १०।१०।११
आयात यूयं भुवनाधिपत्यकामा महेशं सकृदर्चयध्वम् ।
एनं पुराभ्यर्च्य हिरण्यगर्भो भूतस्य जातः पतिरेक आसीत् ॥९९॥ ऋ. ८।७।३
ये कामयन्ते विपुलां श्रियं ते श्रीकण्ठमेनं सकृदानमन्ताम् ।
श्रीमानयं श्रीपतिवन्द्यपादः श्रीणामुदारो धरुणोरयीणाम् ॥१००॥ ऋ. ७।८।२८
सुपुत्रकामा अपि ये मनुष्या युवानमेनं गिरिशं यजन्ताम् ।
यतः स्वयम्भूर्जगतां विधाता हिरण्यगर्भः समवर्तताग्रे ॥१०१॥ ऋ. ८।७।३
अलं किमुक्तैर्बहुभिः समीहितं सपर्यमस्याश्रयणेन सिध्यति ।
पुरैनमाश्रित्य हि कुम्भसम्भवो दिवा न नक्तं पलितो बभूविवान् ॥१०२॥ ऋ. २।२।१३
अन्यत्परित्यज्य ममाक्तिभृंगाः सर्वं सदैनं शिवमाश्रयध्वम् ।
आमोदवानेष मृदुः शिवोयं स्वादुष्किलायं मधुमां उतायम् ॥१०३॥ ऋ. ४।७।३०
भविष्यसि त्वं प्रतिमानहीनो विनिर्जिताशेषनरामरश्च ।
नमोस्तु ते वाणि महेशमेनं स्तुहि श्रुतं गर्तसदं युवानम् ॥१०४॥ ऋ. २।७।१८
यद्यन्मनश्चिन्तयसि त्वमिष्टं तत्तद्भविष्यत्यखिलं ध्रुवं ते ।
दुःखे निवृत्तिर्विषये कदाचिद्यक्ष्वामहे सौमनसाय रुद्रम् ॥१०५॥ ऋ. ४।२।१९
अज्ञानयोगादपचारकर्म यत्पूर्वमस्माभिरनुष्ठितं ते ।
तदेव सोढ्वा सकलं दयालो पितेव पुत्रान्प्रति नो जुषस्व ॥१०६॥ ऋ. ५।४।२१
संसाराख्यक्रुद्धसर्पेण तीव्रै रागद्वेषोन्मादलोभादिदन्तैः ।
दष्टं दृष्ट्वा मां दयालुः पिनाकी देवस्त्रातास्मीयतामप्ययुच्छन् ॥१०७॥ ऋ. १।७।२४

shrinath.udupa@gmail.com

इत्युक्त्वान्ते यत्समाधेर्नमन्तो रुद्राद्यास्त्वां यान्ति जन्माहिदृष्टाः ।
सन्तो नीलग्रीवसूत्रात्मनाहं तत्वायामि ब्रह्मणा वन्दमानः ॥१०८॥ ऋ. १।२।१५
भवातिभीषणज्वरेण पीडितान् महाभयानशेषपातकालयानदूरकाललोचनान् ।
अनाथनाथ ते करेण भेषजेन कालहन्नु दूषणो वसो मृहे मृशस्व शूर राधसे
॥१०९॥ ६।५।९
जयेम येन शर्वमेतदिष्टमष्टदिग्गजं, भुवस्थलं नभस्थलं दिवस्थलं च तद्धतम् ।
य एष सर्वदेवदानवानतः सभापतिः, स नो ददातु तं रयिं रयिं पिशंगसंदृशम्
॥११०॥ ८।८
नमो भवाय ते हराय भूतिभासितोरसे, नमो मृडाय ते हराय भूतभीतिभंगिने ।
नमः शिवाय विश्वरूपशाश्वताय शूलिने, न यस्य हन्यते सखा न जीयते कदाचन
॥१११॥ ऋ. ८।८।१०
सुरपतिपतये नमो नमः क्षितिपतिपतये नमो नमः प्रजापतिपतये ।
नमो नमोम्बिकापतय उमापतये पशुपतये नमोनमः ॥११२॥ य. ११।१०।२२
विनायकं वन्दकमस्तकाहतिप्रणामसंघुष्टसमस्तविष्टपम् ।
नमामि नित्यं प्रणतार्तिनाशनं कविं कवीनामुपमश्रवस्तमम् ॥११३॥ ऋ. २।६।२६
देवा युद्धे यागे विप्रा स्वीयां सिद्धिं ह्वायन् ह्वायन् ।
यं सिध्यन्ति स्कन्दं वन्दे सुब्रह्मण्योगँ सुब्रह्मण्योम् ॥११४॥ य. ११।११।२।३
नमः शिवायै जगदम्बिकायै शिवप्रियायै शिवविग्रहायै ।
समुद्भवाद्रिपतेः सुतायै चतुष्कपर्दा युवतिः सुपेशाः ॥११५॥ ऋ. ८।६।१६
हिरण्यवर्णां महिनूपुरांघ्रिं प्रसन्नवक्त्रां शुकपद्महस्ताम् ।
विशालनेत्रां प्रणमामि गौरीं वचोविदं वाचमुदीरयन्तीम् ॥११६॥ ऋ. ६।७।८

shrinath.udupa@gmail.com

नमामि मेनातनयाममेयामुमामिमां मानवतीं च मान्याम् ।
करोति या भूतिसितौ स्तनौ द्वौ प्रियं सखायं परिषस्वजाना ॥११७॥ ऋ. ५।१।१९
कान्तामुमाकान्त नितान्तकान्तिभ्रान्तामुपान्तानतहर्यजेन्द्राम् ।
नतोस्मि यास्ते गिरिशस्य पार्श्वे विश्वानि देवी भुवनाभिचक्ष्य ।११८। ऋ.१।६।२५
वन्दे गौरीं तुङ्गपीनस्तनीं त्वां चन्द्राचूडां श्लिष्टसर्वाङ्गरागाम् ।
एषा देवी प्राणिनामन्तरात्मा देवं देवं राधसे चोदयन्ती ॥११९॥ ऋ. ५।५।२६
एनां वन्दे दीनरक्षाविनोदां मेनाकन्यामानतानन्ददात्रीम् ।
या विद्यानां मंगलानां च वाचामेषानेत्री राधसः सूनृतानाम् ॥१२०॥ ऋ. ५।५।२३
भवाभिभीतोरुभयापहन्त्रि भवानि भोग्याभरणैकभोगैः ।
श्रियं परां देहि शिवप्रिये नो ययाति विश्वा दुरिता तरेम ॥१२१॥ ऋ. ६।३।२८
शिवे कथं त्वं मतिभिस्तु गीयसे जगत्कृतिःकेलिरयं शिवः पतिः ।
हरिस्तु दासोनुचरेन्दिरा शची सरस्वती वा सुभगादुदिर्वसु ॥१२२॥ ऋ. ६।२।४
इमं स्तवं जैमिनिना प्रचोदितं द्विजोत्तमो यः पठतीशभक्तितः ।
तमिष्टवाक्सिद्धिमतिद्युतिश्रियः परिष्वजन्ते जनयो यथापतिम् ।१२३। ऋ. ७।८।२४
महीपतिर्यस्तु युयुत्सुरादरादिमं पठत्यस्य तथैव सुन्दरम् ।
प्रयान्ति वा शीघ्रमथान्तकान्तिकं भियं दधाना हृदयेषु शत्रवः ।१२४। ऋ.८।३।१९
त्रैवर्णिकेष्वन्यतमो य एनं नित्यं कदाचित् पठतीशभक्तितः ।
कलेवरान्ते शिवपार्श्ववर्ती निरंजनः साम्यमुपैति दिव्यम् ॥१२५॥ मुण्डकोपनिषदि५०
लभन्ते पठन्तो मतिं बुद्धिकामा लभन्ते चिरायुस्तथायुष्यकामाः ।
लभन्ते पठन्तः श्रियं पुष्टिकामा लभन्ते ह पुत्राँ ल्लभन्ते ह पुत्रान् ॥१२६॥ऋ.९।१०

इत्यनेन स्तवेनेशं स्तुत्वासौ जैमिनिर्मुनिः ।
स्नेहाश्रुपूर्णनयनः प्रणनाम सभापतिम् ॥१२७॥

shrinath.udupa@gmail.com

मुहुर्मुहुः पिबन्नीशताण्डवामृतमागलम् ।
सर्वान् कामानवाप्यान्ते गाणपत्यमवाप सः ॥१२८॥
पादं वाप्यर्धपादं वा श्लोकं श्लोकार्धमेव वा ।
यस्तु वाचयते नित्यं समोक्षमधिगच्छति ॥ १२९ ॥
वेदः शिवः शिवो वेदो वेदाध्यायी सदाशिवः ।
तस्मात्सर्वप्रयत्नेन वेदाध्यायिनमर्चयेत् ॥ १३० ॥
अधीतविस्मृतो वेदो वेदपादस्तवं पठन् ।
स चतुर्वेदसाहस्रपारायणफलं लभेत् ॥ १३१ ॥
कृपासमुद्रं सुमुखं त्रिनेत्रं जटाधरं पार्वतिवामभागम् ।
सदाशिवं रुद्रमनन्तरूपं विश्वेश्वरं त्वां हृदि भावयामि ॥१३२॥
आनन्दनृत्यसमये नटनायकस्य पादारविन्दमणिनूपुरशिञ्जितानि ।
आनन्दयन्ति मदयन्ति विमोहयन्ति रोमांचयन्ति नयनानि कृतार्थयन्ति ।
अतिभीषणकटुभाषणयमकिंकरपटलीकृततताडनपरिपीडनमरणागमसमये ।
उमया सह मम चेतसि यमशासननिवसन् हर शंकर शिव शंकर हर मे हर दुरितम्३४

॥ इति जैमिनिकृतवेदपादस्तोत्रं सम्पूर्णम् ॥

॥ शुभम् ॥

B. N. SHRINATH UDUPA
"TRIPURA SHRI" # 2/217
Kadikallkatte, Japthi – 576 211
Kundapura (T), Udupi Dist.
Cell : +91-9740063904
Email : shrinath.udupa@gmail.com



shrinath.udupa@gmail.com

॥ श्रीगणेशाय नमः ॥

अथ

शिवाष्टोत्तरशतनामस्तोत्रप्रारंभः

महादेवः शिवः शम्भुः शङ्करो वृषवाहनः ।
नीलकण्ठश्चतुर्बाहुः पञ्चवक्त्रस्त्रिलोचनः ॥ १ ॥
महारुद्रो महानन्दी महाकालो गणेश्वरः ।
महामायो महासौम्यः सर्वज्ञो भक्तवत्सलः ॥ २ ॥
पार्वतीरमणः सिद्धः साध्यो नारायणप्रियः ।
चन्द्रार्धमस्तकः स्थाणुर्जितशत्रुर्जितेन्द्रियः ॥ ३ ॥
अनन्तः सकलानन्तः सहस्राक्षः सनातनः ।
कैलासनिलयः शान्तः कामदः कामनाशनः ॥ ४ ॥
निर्गुणो निष्कलो नित्यो निर्विकल्पो निरंजनः ।
कृत्तिवासा जटी शूली पिनाकी पिङ्गलोचनः ॥ ५ ॥
गङ्गाधरः सुरश्रेष्ठः सुव्रतः सुप्रभाकरः ।
पुरुषः पुष्कलः पूज्यः पूर्णानन्दः परात्परः ॥ ६ ॥
संहारमूर्तिर्विश्वात्मा वेदात्मा करुणाकरः ।
त्रिगुणात्मा त्रिलोकेशस्त्रिमूर्तिस्त्रिपुरान्तकः ॥ ७ ॥
उग्रः सेनापतिः स्कन्दः स्मशाननिलयो भवः ।
वीरभद्रो विरूपाक्षो गजवक्त्रो गणाधिपः ॥ ८ ॥
क्षेत्रपालो लोकपालः कपाली कमलेक्षणः ।
देवदेवो जगन्नाथो जगद्वंद्यो जगद्गुरुः ॥ ९ ॥

shrinath.udupa@gmail.com

जगत्कर्ता जगत्साक्षी जगदात्मा जनार्दनः ।
अष्टमूर्तिरनाद्यन्तः शुद्धदेवोत्तमोत्तमः ॥ १० ॥
अतिस्निग्धोऽतिगम्भीरो रौद्रः सङ्कर्षणो हरः ।
महानीलोन्धकरिपुर्महातेजो हुताशनः ॥ ११ ॥
भूतनाथो जगद्योनिर्भस्मशायी महेश्वरः ।
भक्तप्रियो महायोगी भोगी कल्याणवान् प्रभुः ॥ १२ ॥
अन्तर्यामी त्रिधामा च वाचस्पतिरहस्पतिः ।
सर्वपापहरश्चेति नाम्नामष्टोत्तरं शतम् ॥ १३ ॥
एककालं द्विकालं वा त्रिकालं नित्यमेव वा ।
जपेदष्टशतं नाम्नां सर्वपापैः प्रमुच्यते ॥ १४ ॥
हर शंभो महादेव विश्वेशामरवल्लभ ।
शिव शङ्कर सर्वात्मन् नीलकण्ठ नमोस्तुते ॥ १५ ॥
मृत्युञ्जयाय रुद्राय नीलकण्ठाय शम्भवे ।
अमृतेशाय शर्वाय महादेवाय ते नमः ॥ १६ ॥

॥ इति श्रीमहादेवाष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ॥



श्रीसाम्बसदाशिवार्पणमस्तु ।

अथैकादशरुद्राणां नामानि शैवागमे—शंभुः पिनाकी गिरिशः स्थाणुर्भर्गः सदाशिवः । शिवो हरस्तथा शर्वः कपाली भव एव च । एकादशैते कथिता रुद्रा लोकहिते रताः ॥ अथाष्टमूर्तिनामानि शैवपुराणे प्रथमसंहितायां २२ अध्याये—क्षितिरापोऽनलो वायुराकाशः सूर्यसोमकौ । यजमान इति त्वष्टौ मूर्तयः परिकीर्तिताः ॥ अथैतेषामधिदेवताः क्रमशः—शर्वो भवश्च रुद्रश्च उग्रो भीम इतीश्वरः । महादेवः पशुपतिरेतान्मूर्तिभिरर्चयेत् ॥ इति ॥

shrinath.udupa@gmail.com

* श्रीगणेशाय नमः *

अथ शिवाष्टोत्तरशतनामावलिः

प्रारभ्यते ।

१ ॐ महादेवाय नमः
२ शिवाय नमः
३ शम्भवे नमः
४ शङ्कराय नमः
५ वृषवाहनाय नमः
६ नीलकण्ठाय नमः
७ चतुर्बाहवे नमः
८ पञ्चवक्त्राय नमः
९ त्रिलोचनाय नमः
१० महारुद्राय नमः
११ महानन्दिने नमः
१२ महाकालाय नमः
१३ गणेश्वराय नमः
१४ महामायाय नमः
१५ महासौम्याय नमः
१६ सर्वज्ञाय नमः
१७ भक्तप्रियाय नमः
१८ पार्वतीरमणाय नमः
१९ सिद्धाय नमः
२० साध्याय नमः
२१ नारायणप्रियाय नमः
२२ चन्द्रार्धमस्तकाय नमः
२३ स्थाणवे नमः
२४ जितशत्रवे नमः
२५ जितेन्द्रियाय नमः
२६ अनन्ताय नमः
२७ सकलानन्ताय नमः
२८ सहस्राक्षाय नमः
२९ सनातनाय नमः
३० कैलासनिलयाय नमः
३१ शान्ताय नमः
३२ कामदाय नमः

shrinath.udupa@gmail.com

३३ कामनाशनाय नमः
३४ निर्गुणाय नमः
३५ निष्कलाय नमः
३६ नित्याय नमः
३७ निर्विकल्पाय नमः
३८ निरञ्जनाय नमः
३९ कृत्तिवाससे नमः
४० जटिने नमः
४१ शूलिने नमः
४२ पिनाकिने नमः
४३ पिङ्गलोचनाय नमः
४४ गङ्गाधराय नमः
४५ सुरश्रेष्ठाय नमः
४६ सुव्रताय नमः
४७ सुप्रभाकराय नमः
४८ पुरुषाय नमः
४९ पुष्कलाय नमः
५० पूज्याय नमः
५१ पूर्णानन्दाय नमः
५२ परात्पराय नमः
५३ संहारमूर्तये नमः
५४ विश्वात्मने नमः
५५ वेदात्मने नमः
५६ करुणात्मने नमः
५७ त्रिगुणात्मने नमः
५८ त्रिलोकेशाय नमः
५९ त्रिमूर्तये नमः
६० त्रिपुरान्तकाय नमः
६१ उग्राय नमः
६२ सेनापतये नमः
६३ स्कन्दाय नमः
६४ श्मशाननिलयाय नमः
६५ भवाय नमः
६६ वीरभद्राय नमः
६७ विरूपाक्षाय नमः
६८ गजवक्त्राय नमः
६९ गणाधिपाय नमः
७० क्षेत्रपालाय नमः
७१ लोकपालाय नमः
७२ कपालिने नमः
७३ कमलेक्षणाय नमः
७४ देवदेवाय नमः
७५ जगन्नाथाय नमः
७६ जगद्बन्धाय नमः

shrinath.udupa@gmail.com

७७ जगद्गुरवे नमः
७८ जगत्कर्त्रे नमः
७९ जगत्साक्षिणे नमः
८० जगदात्मने नमः
८१ जनार्दनाय नमः
८२ अष्टमूर्तये नमः
८३ अनाद्यन्ताय नमः
८४ शुद्धदेवाय नमः
८५ उत्तमोत्तमाय नमः
८६ अतिस्निग्धाय नमः
८७ अतिगम्भीराय नमः
८८ रौद्राय नमः
८९ सङ्कर्षणाय नमः
९० हराय नमः
९१ महानीलाय नमः
९२ अन्धकरिपवे नमः
९३ महातेजसे नमः
९४ हुताशनाय नमः
९५ भूतनाथाय नमः
९६ जगद्योनये नमः
९७ भस्मशायिने नमः
९८ महेश्वराय नमः
९९ भक्तप्रियाय नमः
१०० महायोगिने नमः
१०१ भोगिने नमः
१०२ कल्याणवते नमः
१०३ प्रभवे नमः
१०४ अन्तर्यामिने नमः
१०५ त्रिधाम्ने नमः
१०६ वाचस्पतये नमः
१०७ अहस्पतये नमः
१०८ ॐ सर्वपापहराय नमः

॥ इति शिवाष्टोत्तरशतनामावलिः समाप्ता ॥

❀ शुभम् ❀

B. N. SHRINATH UDUPA
"TRIPURA SHRI" # 2/217
[illegible] 576 211
Kundapur Tq., Udupi Dist.
Cell : +91-9740067904
Email : shrinath.udupa@gmail.com

shrinath.udupa@gmail.com

अथ परमेश्वरमातृकावर्णमालास्तोत्रम् ।

अद्भुतविग्रह अमराधीश्वर अगणितगुणगण अमृत शिव ।
साम्बसदाशिव साम्ब सदाशिव साम्ब सदाशिव साम्ब शिव ॥१॥ (पल्ल)
आनन्दामृत आश्रितरक्षक आत्मानन्द महेश शिव ॥ साम्बस० ॥२॥
इन्दुकलाधर इन्द्रादिप्रिय सुन्दररूप सुरेश शिव ॥ साम्बस० ॥३॥
ईश सुरेश महेश जनप्रिय केशवसेवितपाद शिव ॥ साम्बस० ॥४॥
उरगादिप्रियभूषण शङ्कर नरकविनाश नटेश शिव ॥ साम्बस० ॥५॥
ऊर्जितदानवनाश परात्पर अर्चितपापविनाश शिव ॥ साम्बस० ॥६॥
ऋग्वेदश्रुतिमौलिविभूषण रविचन्द्राग्निनेत्र शिव ॥ साम्बस० ॥७॥
ऌपमनादिप्रपञ्चविलक्षण तापनिवारण तत्त्वशिव ॥ साम्बसदा० ॥८॥
लिङ्गस्वरूप सर्वबुधप्रिय मङ्गलमूर्तिमहेश शिव ॥ साम्बसदा० ॥९॥
ॡताधीश्वररूपप्रिय शिव वेदान्तप्रियवेद्य शिव ॥ साम्बसदा० ॥१०॥
एकानेकस्वरूप विश्वेश्वर योगिहृदिप्रियवास शिव ॥ साम्बस० ॥११॥
ऐश्वर्याश्रय चिन्मय चिद्घन अच्युतानन्त महेश शिव ॥ साम्बसदा० ॥१२॥
ॐकारप्रिय उरगविभूषण हीङ्कारादि महेश शिव ॥ साम्बसदा० ॥१३॥
औरसलालित अन्तकनाशन गौरीसमेत गिरीश शिव ॥ साम्ब० ॥१४॥
अम्बरवास चिदम्बरनायक तुम्बुरुनारदसेव्य शिव ॥ साम्ब० ॥१५॥
अहरहःप्रिय आदिगिरीश्वर भोगादिप्रिय पूर्ण शिव ॥ साम्ब० ॥ १६ ॥
कमलापार्चित कैलासप्रिय करुणासागरकान्ति शिव ॥ साम्ब० ॥१७॥

shrinath.udupa@gmail.com

खड्गशूलमृडढक्काद्यायुध विक्रमरूप विश्वेश शिव ॥ साम्बसदा० ॥१८॥
गङ्गागिरिसुत वल्लभगुणहित शङ्कर सर्वजनेश शिव ॥ साम्ब० ॥१९॥
घातकभञ्जन पातकनाशन गौरीसमेत गिरीश शिव ॥ साम्बसदा० ॥२०॥
ङ्चौश्रितमौलिविभूषण वेदस्वरूप विश्वेश शिव ॥ साम्बसदा० ॥२१॥
चण्डविनाशन सकलजनप्रिय मण्डलाधीश विश्वेश शिव ॥ साम्ब० ॥२२॥
छत्रकिरीटसुकुण्डलशोभित पुत्रप्रिय विश्वेश शिव ॥ साम्बसदा० ॥२३॥
जन्मजरामृतिनाशन कल्मषरहित तापविनाश शिव ॥ सांब० ॥२४॥
झङ्काराश्रय भृङ्गिरिटिप्रिय ॐकारेश महेश शिव ॥ साम्बसदा०॥२५॥
ज्ञानाज्ञानविनाशक निर्मल दीनजनप्रिय दोष शिव ॥ साम्बस० ॥२६॥
टङ्काद्यायुधधारण सत्वर ह्रीङ्कारादि सुरेश शिव ॥ साम्बसदा० ॥२७॥
ट्ठङ्स्वरूप सहकारोत्तम वागीश्वर वरदेश शिव ॥ साम्बसदा० ॥२८॥
डम्बविनाशन डिण्डिमभूषण अम्बरवास चिदीश शिव ॥ साम्बस०॥२९॥
ढं ढं डमरुक धरणीनिश्चल ढुण्डिविनायकसेव्य शिव ॥ साम्बस० ॥३०॥
नलिनविलोचन नटनमनोहर अलिकुलभूषण अमृत शिव ॥ साम्ब०॥३१॥
तत्त्वमसीत्यादिवाक्यस्वरूपक नित्यानन्द महेश शिव ॥ सम्बस० ॥३२॥
स्थावर जङ्गमभुवनविलक्षण भावुकमुनिवरसेव्य शिव ॥ साम्बस० ॥३३॥
दुःखविनाशन दलितमनोन्मन चन्दनलेपितचरण शिव ॥ साम्ब० ॥३४॥
धरणीधर शुभधवलविभास्वर धनदादिप्रियदान शिव ॥ साम्ब०॥३५॥
नानामणिगणभूषण निर्गुण नटनजनप्रियनाट्य शिव ॥ साम्ब० ॥३६॥
पन्नगभूषण पार्वतिनायक परमानन्द परेश शिव ॥ साम्बसदा० ॥३७॥
फालविलोचन भानुकोटिप्रभ हालाहलधर अमृत शिव ॥ साम्ब० ॥३८॥
बन्धविनाशन हर विश्वम्भर स्कन्दादिप्रिय कनक शिव ॥ साम्बस०॥३९॥

shrinath.udupa@gmail.com

भस्मविलेपन भवभयनाशन विस्मयरूप विश्वेश शिव ॥ साम्ब० ॥४०॥
मन्मथनाशन मधुपानप्रिय मन्दरपर्वतवास शिव ॥ साम्बस० ॥४१॥
यतिहृदयनिवासित ईश्वर विधिविष्ण्वादिसुरेश शिव ॥ साम्बस० ॥४२॥
रामेश्वर रमणीयमुखाम्बुज सोमशेखर सुकृत शिव ॥ साम्बसदा० ॥४३॥
लङ्काधीश्वर सुरगणसेवित लावण्यामृत अमृत शिव ॥ साम्बस० ॥४४॥
वरदाभयकर वासुकिभूषण वनमालादिविभूष शिव ॥ साम्ब० ॥४५॥
शान्तस्वरूप जगत्त्रयचिन्मय कान्तिमतिप्रियकनक शिव ॥ साम्ब० ॥४६॥
षण्मुखजनक सुरेन्द्रमुनिप्रिय षाड्गुण्यादिसमेत शिव ॥ साम्ब० ॥४७॥
संसारार्णवनाशन शाश्वत साधुहृदिप्रियवास शिव ॥ साम्बस० ॥४८॥
हर पुरुषोत्तम अद्वैतामृत पूर्णमुरारिसुसेव्य शिव ॥ साम्बस० ॥४९॥
लालितभक्तजनेश निजेश्वर कालि नटेश्वर काम शिव ॥ साम्ब० ॥५०॥
क्षररूपादि प्रियान्वित सुन्दर साक्षिजननाथस्वामि शिव ॥ साम्ब०॥५१॥

इति श्री परमेश्वरमातृकावर्णमालास्तोत्रंसम्पूर्णम् ।



shrinath.udupa@gmail.com

अथ शिव आरती ।

हरिः ॐ

नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटीयुगधारिणे नमः ॥

ॐ जय गङ्गाधर हर शिव जय गिरिजाधीश शिव जय गौरीनाथ त्वं मां पालय नित्यं २ कृपया जगदीश–

॥ ॐ हर हर हर महादेव ॥ (पल्ल)

कैलासे गिरिशिखरे कल्पद्रुमविपिने शिवकल्प० गुञ्जति मधुकरपुञ्जे २ कुञ्जवने गहने ॥ कोकिल कूजति खेलति हंसावलिललिता शिव हंसा० रचयति कलाकलापं २ नृत्यति मुदसहिता ॐ हर ३ महादेव ॥ १ ॥ तस्मिञ्ललित सुदेशे शालामणिरचिता शिव शाला० तन्मध्ये हरनिकटे २ गौरी मुदसहिता ॥ क्रीडां रचयति भूषां रञ्जित निजमीशं शिव रञ्जित० इन्द्रादिकसुरसेवित २ प्रणमति ते शीर्षम् ॐ हर हर हर महादेव ॥ २ ॥ विबुधवधूर्बहु नृत्यति हृदये मुदसहिता शिव हृदये० किन्नरगायन कुरुते २ सप्त स्वर सहिता ॥ धिनकत थै थै धिनकत मृदङ्गं वादयते शिव मृदङ्गं० क्वण क्वण ललिता वेणु २ मधुरं नादयते ॐ हर ३ महादेव ॥ ३ ॥ रुण रुण चरणे रचयति नूपुरमुज्ज्वलितं शिव नूपुर० चक्रावर्ते भ्रमयति २ कुरुते तां धिक तां ॥ तां तां लुप चुप तालं नादयते शिव तालं० अङ्गुष्ठाङ्गुलिनादं २ लास्यकतां कुरुते ॐ हर ३ महादेव ॥४॥ कर्पूरद्युतिगौरं पञ्चाननसहितं शिव पञ्चा० त्रिनयनशशधरमौले २ विषधरकण्ठयुतम् ॥ सुन्दरजटाकलापं पावक-

shrinath.udupa@gmail.com

युतभालं शिव पावकशशि० डमरुत्रिशूलपिनाकं २ करधृतनृकपालम् ॐ हर ३ महादेव ॥४॥ शङ्खनिनादं कृत्वा झल्लरिनादयते शिव झल्लरि० नीराजयते ब्रह्मा नीराजयते विष्णुर्वेदऋचां पठते ॥ इतिमृदुचरणसरोजं हृदि कमले धृत्वा शिव हृदि० अवलोकयति महेशं शिव लोकयति सुरेशं ईशं अभिनत्वा ॐ हर ३ महादेव ॥६॥ रुण्डै रचयति माला पन्नगमुपवीतं शिव पन्नग० वामविभागे गिरिजा २ रूपं अतिललितम् ॥ सुन्दरसकलशरीरे मनसिजकृत-भस्माभरणं शिव कृत० इतिवृषभध्वजरूपं हरशिवशङ्करूपं तापत्रयहरणं ॐ हर ३ महादेव ॥ ७ ॥ ध्यानं आरति समये हृदये इतिकृत्वा शिव हृदये० रामं त्रिजटानाथं २ ईशं अभिनत्वा ॥ सङ्गीतमेवं प्रतिदिनपठनं यः कुरुते शिव पठनं० शिवसायुज्यं गच्छति २ भक्त्या यः शृणुते ॐ हर ३ महादेव ॥८॥ जय गङ्गाधर हर शिव जय गिरिजाधीश शिव जय गौरीनाथ त्वं मां पालय नित्यं त्वं मां पालय शम्भो कृपया जगदीश ॐ हर हर हर महादेव ॥ ॥ ॥

ॐ वन्दे देवमुमापतिं सुरगुरुं वन्दे जगत्कारणं वन्दे पन्नगभूषणं मृग-धरं वन्दे पशूनां पतिम् ॥ वन्दे सूर्यशशाङ्कवह्निनयनं वन्दे मुकुन्दप्रियं वन्दे भक्तजनाश्रयं च वरदं वन्दे शिवं शङ्करम् ॥१॥ शान्तं पद्मासनस्थं शशि-धरमुकुटं पञ्चवक्त्रं त्रिनेत्रं शूलं वज्रं च खड्गं परशुमभयदं दक्षिणाङ्गे वहन्तम् ॥ नागं पाशं च घण्टां डमरुकसहितं साङ्कुशं वामभागे नानालङ्कारदीप्तं स्फटिकमणिनिभं पार्वतीशं नमामि ॥२॥ कर्पूरगौरं करुणावतारं संसारसारं भुजगेन्द्रहारम् ॥ सदा वसन्तं हृदयारविन्दे भवं भवानीसहितं नमामि ॥३॥ असितगिरिसमं स्यात्कज्जलं सिन्धुपात्रे सुरतरुवरशाखा लेखनी पत्रमुर्वी ॥ लिखति यदि गृहीत्वा शारदा सर्वकालं तदपि तव गुणानामीश पारं न

shrinath.udupa@gmail.com

याति ॥४॥ त्वमेव माता च पिता त्वमेव त्वमेव बन्धुश्च सखा त्वमेव ॥ त्वमेव विद्या द्रविणं त्वमेव त्वमेव सर्वं मम देव देव ॥५॥ करचरणकृतं वाक्कायजं कर्मजं वा श्रवणनयनजं वा मानसं वाऽपराधम् ॥ विहितमविहितं वा सर्वमेतत्क्षमस्व जय जय करुणाब्धे श्रीमहादेव शम्भो ॥६॥ चन्द्रोद्भासितशेखरे स्मरहरे गङ्गाधरे शङ्करे सर्पैर्भूषितकण्ठकर्णविवरे नेत्रोत्थवैश्वानरे ॥ दन्तित्वक्कृतसुन्दराम्बरधरे त्रैलोक्यसारे हरे मोक्षार्थं कुरु चित्तवृत्तिमचलामन्यैस्तु किं कर्मभिः ॥ ७ ॥

हरिः ॐ तत्पुरुषाय विद्महे महादेवाय
धीमहि तन्नो रुद्रः प्रचोदयात्।

ॐ—यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्रथमान्यासन्। ते ह नाकम्महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः।

ॐ—राजाधिराजाय प्रसह्य साहिने। नमो वयं वैश्रवणाय कुर्महे। समे कामान्कामकामाय मह्यम्। कामेश्वरो वैश्रवणो ददातु। कुबेराय वैश्रवणाय। महाराजाय नमः॥

ॐ—विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतोबाहुरुत विश्वतस्पात्। सम्बाहुभ्यां धमति सम्पतत्त्रैर्द्यावाभूमी जनयन्देव एकः॥

ॐ—नानासुगन्धपुष्पाणि यथाकालोद्भवानि च।
पुष्पाञ्जलिं मया दत्तं गृहाण परमेश्वर॥

गौरीनाथं विश्वनाथं शरण्यं भूतावासं वासुकीकण्ठभूषम्।
त्र्यक्षं पञ्चास्यादिदेवं पुराणं वन्दे सान्द्रानन्दसन्दोहदक्षम्॥

॥ ॐ तत्सत् श्रीशिवार्पणमस्तु ॥

॥ इति शिवस्य आरती सम्पूर्णा ॥

shrinath.udupa@gmail.com



रुद्राष्टकम्

अथ रुद्राष्टकस्तोत्रम् ॥ भुजङ्गप्रयातवृत्तम् ॥

नमामीशमीशाननिर्वाणरूपं विभुं व्यापकं ब्रह्मवेदस्वरूपम् ।
अजं निर्गुणं निर्विकल्पं निरीहं चिदाकाशमाकाशवासं भजेऽहम् ॥ १ ॥
निराकारमोङ्कारमूलं तुरीयं गिराज्ञानगोऽतीतमीशं गिरीशम् ।
करालं महाकालकालं कृपालं गुणागारसंसारपारं नतोऽहम् ॥ २ ॥
तुषाराद्रिसङ्काशगौरं गभीरं मनोभूतकोटिप्रभासीशरीरम् ।
स्फुरन्मौलिकल्लोलिनीचारुगङ्गा लसद्भालबालेन्दुकण्ठेभुजङ्गम् ॥ ३ ॥
लसत्कुण्डलं शुभ्रनेत्रं विशालं प्रसन्माननं नीलकण्ठं दयालुम् ।
मृगाधीशचर्माम्बरं मुण्डमालं प्रियं शङ्करं सर्वनाथं भजामि ॥ ४ ॥
प्रचण्डं प्रकृष्टं प्रगल्भं परेशं अखण्डं ह्यजं भानुकोटिप्रकाशम् ।
त्रयीशूलनिर्मूलनं शूलपाणिं भजेऽहं भवानीपतिं भावगम्यम् ॥ ५ ॥
कलातीतकल्याणकल्पान्तकारी सदासज्जनानंददाता पुरारिः ।
चिदानन्दसन्दोहमोहापहारी प्रसीद प्रसीद प्रभो मन्मथारिः ॥ ६ ॥
न यावदुमानाथपादारविन्दं भजन्तीह लोके परे वा नराणाम् ।
न तावत्सुखं शान्तिसन्तापनाशः प्रसीद प्रभो सर्वभूताधिवासिन् ॥ ७ ॥
न जानामि योगं जपं नैव पूजां नतोऽहं सदा सर्वदाशम्भु तुभ्यम् ।
जराजन्मदुःखौघतातप्यमानं प्रभो पाहि मामीश शम्भो निरङ्कम् ॥ ८ ॥
रुद्राष्टकमिदं प्रोक्तं विप्रेण हरतुष्टये ।
ये पठन्ति नरा भक्त्या तेषां शम्भुः प्रसीदति ॥ ९ ॥

॥ इति रुद्राष्टकं समाप्तम् ॥

॥ अथ श्रीपशुपतिस्तोत्रप्रारम्भः ॥

shrinath.udupa@gmail.com

संवर्ताग्नितडित्प्रदीप्तकनकप्रस्पर्धितेजोरुणम् ।
गम्भीरध्वनिसामवेदजनकं ताम्राधरं सुन्दरम् ॥
अर्धेन्दुद्युतिलोलपिङ्गलजटाभारप्रबद्धोरगम् ।
वन्दे सिद्धसुरासुरेन्द्रनमितं पूर्वं मुखं शूलिनः ॥ १ ॥
कालाभ्रभ्रमराञ्जनद्युतिनिभं व्यावृत्तपिङ्गेक्षणम् ।
कर्णोद्भासितभोगिमस्तकमणिप्रोद्भिन्नदंष्ट्राङ्कुरम् ॥
सर्पप्रोतकपालशुक्तिशकलव्याकीर्णवक्षोरगम् ।
वन्दे दक्षिणमीश्वरस्य वदनं चाथर्वनादोदयम् ॥ २ ॥
प्रालेयाचलचन्द्रकुन्दधवलं गोक्षीरफेनप्रभम् ।
भस्माभ्यक्तमनङ्गदेहदहनज्वालावलीलोचनम् ॥
ब्रह्मेन्द्रादिमरुद्गणार्चितपदं ऋग्वेदनादोदयम् ।
वन्देऽहं सकलं कलङ्करहितं स्थाणोर्मुखं पश्चिमम् ॥ ३ ॥
गौरं कुङ्कुमपङ्कगन्धसलिलव्यापाण्डुगण्डस्थलम् ।
भ्रूविक्षेपकटाक्षवीक्षणलसत्संसक्तकर्णोत्पलम् ॥
स्निग्धं बिम्बफलाधरप्रहसितं नीलालकं सुन्दरम् ।
वन्दे याजुषवेदघोषजनकं वक्त्रं हरस्योत्तरम् ॥ ४ ॥
व्यक्ताव्यक्तनिरूपितं च परमं षट्त्रिंशतत्वात्मकम् ।
तस्मादुत्तरतत्वमक्षरपदं ध्येयं सदा योगिभिः ॥
ओङ्कारादिसमस्तमन्त्रजनकं सूक्ष्मातिसूक्ष्मात्परम् ।
वन्देऽहं परमेश्वरस्य वदनं खव्यापि तेजोमयम् ॥ ५ ॥
सर्वथा यत्पशून् पाति तैश्च यद्रमते सह ।
तेषामधिपतिर्यश्च तस्मात्पशुपतिः स्मृतः ॥ ६ ॥

इति श्रीपशुपतिस्तोत्रं सम्पूर्णम् ॥

अथ बिल्वमहिम्नः स्तोत्रम् ।

shrinath.udupa@gmail.com

अखण्डैर्बिल्वपत्रैश्च पूजयेन्नन्दिकेश्वरम् ॥ मुच्यते सर्वपापेभ्य एकबिल्वं शिवार्पणम् ॥१॥
शालग्रामसहस्राणामिष्टापूर्तशतस्य च ॥ यज्ञकोटिसहस्राणामेकबिल्वं शिवा० ॥२॥
अमृतोद्भवश्रीवृक्षो महादेवप्रियः सदा ॥ प्रसीद देवदेवेश एकबिल्वं शिवा० ॥३॥
अज्ञानेन कृतं पापं परमस्त्वतिदुर्लभः ॥ क्रतुर्भवतु मे देव एकबिल्वं शिवा० ॥४॥
हस्तिकोटिसहस्राणामश्वमेधशतस्य च ॥ कोटिकन्याप्रदानस्य एकबिल्वं शिवा० ॥५॥
त्रिदलैर्बिल्वपत्रैश्च ह्यच्छिद्रैः कोमलैः शुभैः ॥ तव पूजां करिष्यामि एकबिल्वं शिवा० ॥६॥
त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रयायुधम् ॥ त्रिजन्मपापसंहारमेकबिल्वं शिवा० ॥७॥
दर्शनं बिल्ववृक्षस्य स्पर्शनं पापनाशनम् ॥ अघोरपापसंहारमेकबिल्वं शिवा० ॥८॥
शतकोटिसहस्रं च अश्वत्थे स्थापिते तथा ॥ सहस्रस्योपनयनं एकबिल्वं शिवा० ॥९॥
उमया सहितं देवं सवाहनगणं शिवम् ॥ भस्मानुलिप्तसर्वाङ्गमेकबिल्वं शिवा० ॥१०॥
तुलसीबिल्वनिर्गुण्डीजम्बीरामलकं तथा ॥ पञ्च बिल्वमितिख्यातमेकबिल्वं शिवा०॥११॥
नमः शिवाय रुद्राय सर्वशक्तिधराय च ॥ सर्वविद्याधिपतये भूतानां पतये नमः ॥१२॥
नमः शिवाय साम्बाय सगणाय ससूनवे ॥ सनन्दिने सगङ्गाय सविषाय नमो नमः ॥१३॥
ये मामनन्यशरणाः सततं वरेण्यं सम्पूजयन्ति नवकोमलबिल्वपत्रैः ॥
ते निर्गुणा अपि गुणाम्बुधयो भवन्ति विन्दन्ति मुक्तिमुपभुक्तसमस्तभोगाः ॥१४॥

इति श्री बिल्वमहिम्नः स्तोत्रं सम्पूर्णम् ॥

नेपाल का शुद्ध बूटी ले सुमुहूर्त मा तयार गरे का आयुर्वेदीय रसादि, काष्ठादि, भस्म, अवलेह, चूर्ण हरू शास्त्रोक्त विधान ले शुद्ध गरी तयार भए काछन् । किफायत साथ पाइन्छ । एक एक अनुभवलिनु भएमा सबै यथार्थ विश्वास हुनेछ ।

श्री नेपाल देश को शुद्ध सुन्दर सुप्रसिद्ध २४ पत्र भएको पंचांग पनिहर साल छापि प्रकाशित हुन्छ । व्यापारी हरूले कार्तिक मैहा भित्र सूचना दिनुपर्छ ॥ अपूर्व ग्रन्थ हरू पनि छापितयार भएको छ सो ग्रन्थ लीन लाई न भूल नु होला, पछिन्या उरी मारी पछितोपर्न जाला, लघु जातक पद्धतिकंरु ८) धन्वन्तरी पूजाविधि कंरु ।८)

सबै प्रकार का आयुर्वेदीय औषधि, पंचांग २ पुस्तक हरू पाइने ठेगाना—

बो० डी० के० नारायण शास्त्री

देवपाटन, पशुपति—पोष्ट नेपाल

shrinath.udupa@gmail.com

B. N. SHRINATH UDUPA
"TRIPURA SHRI" # 2/217
Kalikalikatte, Japthi - 576 211
Kundapur Tq., Udupi Dist.
Cell : +91-9740063904
Email : shrinath.udupa@gmail.com

प्रकाशक—बी० डी० के० नारायणशास्त्री, देवपाटन, पशुपति नेपाल ।

मुद्रक—बी० के० शास्त्री, ज्योतिष प्रकाश प्रेस, विश्वेश्वरगंज, काशी । ३७१०